# श्री देवीवैभवाश्चर्य अष्टोत्तरशतनाम स्तोत्रम्

अस्य श्री देवीवैभवाश्चर्य अष्टोत्तरशत दिव्यनाम स्तोत्र महामन्त्रस्य

आनन्द भैरव ऋषिः । अनुष्टुप् छन्दः । आनन्दभैरवी श्री महात्रिपुरसुन्दरी देवता ।

**॥ ध्यानं ॥**

कुङ्कुमपङ्कसमाभां अङ्कुशपाशेक्षुकोदण्डशराम् ।

पङ्कजमध्य निषण्णां पङ्केरुहलोचनां परां वन्दे

ॐ ऐं ह्रीं श्रीं

परमानन्दलहरी परचैतन्यदीपिका।

स्वयंप्रकाशकिरणा नित्यवैभवशालिनी॥1॥

विशुद्धकेवलाखण्डसत्यकालात्मरूपिणी।

आदिमध्यान्तरहिता महामायाविलासिनी॥2॥

गुणत्रयपरिच्छेत्री सर्वतत्वप्रकाशिनी ।

स्त्रीपुंसभावरसिका जगत्सर्गादिलंपटा॥ 3॥

अशेषनामरूपादिभेदच्छेदरविप्रभा ।

अनादिवासनारूपा वासनोद्यत्प्रपञ्चिका ॥4॥

प्रपञ्चोपशमप्रौढा चराचरजगन्मयी ।

समस्तजगदाधारा सर्वसञ्जीवनोत्सुका ॥ 5॥

भक्तचेतोमयानन्दस्वार्थवैभवविभ्रमा ।

सर्वाकर्षणवश्यादिसर्वकर्मधुरन्धरा ॥6॥

विज्ञानपरमानन्दविद्या सन्तानसिद्धिदा ।

आयुरारोग्यसौभाग्यबलश्रीकीर्तिभाग्यदा॥7॥

धनधान्यमणीवस्त्रभूषालेपनमाल्यदा ।

गृहग्राममहाराज्यसाम्राज्यसुखदायिनी ॥8॥

सप्ताङ्गशक्तिसम्पूर्णसार्वभौमफलप्रदा ।

ब्रह्मविष्णुशिवेन्द्रादिपदविश्राणनक्षमा ॥9॥

भुक्तिमुक्तिमहाभक्तिविरक्त्यद्वैतदायिनी ।

निग्रहानुग्रहाध्यक्षा ज्ञाननिर्द्वैतदायिनी ॥10॥

परकायप्रवेशादियोगसिद्धिप्रदायिनी ।

शिष्टसञ्जीवनप्रौढा दुष्टसंहारसिद्धिदा ॥11॥

लीलाविनिर्मितानेककोटिब्रह्माण्डमण्डला ।

एकानेकात्मिका नानारूपिण्यर्धाङ्गनेश्वरी ॥12॥

शिवशक्तिमयी नित्यशृङ्गारैकरसप्रिया ।

तुष्टा पुष्टाऽपरिच्छिन्ना नित्ययौवनमोहिनी ॥13॥

समस्तदेवतारूपा सर्वदेवाधिदेवता ।

देवर्षिपितृसिद्धादियोगिनीभैरवात्मिका ॥14॥

निधिसिद्धिमणीमुद्रा शस्त्रास्त्रायुधभासुरा ।

छत्रचामरवादित्रपताकाव्यजनाञ्चिता ॥15॥

हस्त्यश्वरथपादातामात्यसेनासुसेविता ।

पुरोहितकुलाचार्यगुरुशिष्यादिसेविता ॥16॥

सुधासमुद्रमध्योद्यत्सुरद्रुमनिवासिनी ।

मणिद्वीपान्तरप्रोद्यत्कदम्बवनवासिनी ॥ 17॥

चिन्तामणिगृहान्तस्था मणिमण्डपमध्यगा ।

रत्नसिम्हासनप्रोद्यच्छिवमञ्चाधिशायिनी ॥18॥

सदाशिवमहालिङ्गमूलसङ्घट्टयोनिका ।

अन्योन्यालिङ्गसङ्घर्षकण्डूसम्क्षुब्धमानसा ॥19॥

कलोद्यद्बिन्दुकालिन्यतुर्यनादपरम्परा ।

नादान्तानन्दसन्दोहस्वयंव्यक्तवचोऽमृता ॥20॥

कामराजमहातन्त्ररहस्याचारदक्षिणा ।

मकारपञ्चकोद्भूतप्रौढान्तोल्लाससुन्दरी ॥21॥

श्रीचक्रराजनिलया श्रीविद्यामन्त्रविग्रहा ।

अखण्डसच्चिदानन्दशिवशक्त्यैक्यरूपिणी ॥22॥

त्रिपुरा त्रिपुरेशानी महात्रिपुरसुन्दरी ।

त्रिपुरावासरसिका त्रिपुराश्रीस्वरूपिणी ॥23॥

महापद्मवनान्तस्था श्रीमत्त्रिपुरमालिनी ।

महात्रिपुरसिद्धाम्बा श्रीमहात्रिपुराम्बिका ॥24॥

नवचक्रक्रमादेवी महात्रिपुरभैरवी ।

श्रीमाता ललिता बाला राजराजेश्वरी शिवा ॥25॥

उत्पत्तिस्थितिसंहारक्रमचक्रनिवासिनी ।

अर्धमेर्वात्मचक्रस्था सर्वलोकमहेश्वरी ॥26॥

वल्मीकपुरमध्यस्था जम्बूवननिवासिनी ।

अरुणाचलशृङ्गस्था व्याघ्रालयनिवासिनी ॥27॥

श्रीकालहस्तिनिलया काशीपुरनिवासिनी ।

श्रीमत्कैलासनिलया द्वादशान्तमहेश्वरी ॥28॥

श्रीषोडशान्तमध्यस्था सर्ववेदान्तलक्षिता ।

श्रुतिस्मृतिपुराणेतिहासागमकलेश्वरी ॥29॥

भूतभौतिकतन्मात्रदेवताप्राणहृन्मयी ।

जीवेश्वरब्रह्मरूपा श्रीगुणाढ्या गुणात्मिका ॥30॥

अवस्थात्रयनिर्मुक्ता वाग्रमोमामहीमयी ।

गायत्रीभुवनेशानीदुर्गाकाल्यादिरूपिणी ॥31॥

मत्स्यकूर्मवराहादिनानारूपविलासिनी ।

महायोगीश्वराराध्या महावीरवरप्रदा ॥32॥

सिद्धेश्वरकुलाराध्या श्रीमच्चरणवैभवा ॥33॥

**॥ ध्यानं ॥**

कुङ्कुमपङ्कसमाभां अङ्कुशपाशेक्षुकोदण्डशराम् ।

पङ्कजमध्य निषण्णां पङ्केरुहलोचनां परां वन्दे ॥